# ।। ऋग्वेदे सूर्यतत्त्वम् ।।

**डॉ. कपिलदेवः हरेकृष्णः शास्त्री**
**प्राध्यापकः, वेदविभागः**
**बरोडा-संस्कृतमहाविद्यालयः**
**म.स.विश्वविद्यालयः,वटोदरम्**

निखिलमपि वैदिकसाहित्यं भगवतो भुवनभास्करस्य सूर्यस्य महिमानं प्रतिपिपादषितां मन्त्रदृशां महर्षीणां चिन्तनसंस्कृतिभिरापूरितम् । वैदिक संहितासु विशेषतः ऋग्वेदे देवता सविस्त्रविवेचनं यत्र तत्र सर्वत्र संदृश्यते । आर्याणां धर्मप्राणता सुतरां प्रथिता । तेषां देवानामस्तित्वे व्यापकतायामक्षुण्णे प्रभावे च दृढो विश्वासोवर्तते । तेषां महर्षीणां कल्पनासु जगदिदं पृथिव्यन्तरिक्षाकाशरूपेण त्रिषु विभागेषु विभक्तमासीत् । प्रत्येकस्मिन् लोके देवानां निवासस्तैः स्वीकृतः । तेषाम् आकृतयः शारीरिक अवयवाश्च नैकेषु स्थलेषु प्राकृतितदृश्यानां प्रतिनिधित्वेन परिकल्पिता विद्यन्ते । यथा हि सवितुर्बाहवः किरणेभ्योऽतिरिक्तं नान्यत् किमपि, अग्नेर्जिह्वा च ज्वालातिरिक्तं किमपि तत्त्वं नास्ति ।

विविधा विचित्राश्च प्रकृत्या लीलाततयो मानवमात्रस्य दैनन्दिनानुभवस्य विषयाः । जगत्यामस्यां जन्मग्रहणेनैव सह मानवः कौतुकाधानहेतूनां प्राकृतिकचमत्काराणां चाकचक्येन समन्तादावृतो विस्मितमात्मानम् अनुभवति । प्राच्यां दिशि प्रभात वेलायां कमनीय किरणजालं विकीर्य भुवनतलं काञ्चनरञ्जितं विधातुकाममग्निपुञ्जकपिशं सवितृबिम्बं तथैव सायन्तने सूर्यमण्डले स्वरजतरश्मिजातं संक्षिप्य पश्चिम आशाभिमुखं प्रतिष्ठमाने निखिलं जगत् शीतलतायाः समुद्रे निमज्जन उन्मज्जनं विदधानां चन्द्रविम्बं कस्य स्वान्ते कौतुकमयं विस्मयं न जनयति ।

विश्वस्मिन् वैदिकसाहित्ये ऋग्वेदे सूर्यश्चराचरात्मकस्य जगत आत्मरूपेण निरूपितः 'सूर्य आत्मा जगतस्तस्थुषश्च' इति । ऋग्वेदस्य प्रथममण्डलीये १६८ सूक्ते सूर्यस्य धीरता बुद्धिप्रेरकता च सुस्पष्टं प्रतिपादिता 'विश्वस्य भुवनस्य गोपाः स मा धारः' इति । धियमीरयिता स आस्तिकैर्द्विजवर्यैः प्रत्यहं सन्ध्यावन्दनसमये गायत्री मन्त्रेण प्रार्थ्यते यत्सः सर्वेषामस्मादृशां जनानां बुद्धीः शुभकार्येषु प्रेरयेत् । सूर्यशब्दस्य व्युत्पत्तिरित्थं समुपलभ्यते । निरूक्तकृता यास्केन 'सूर्य सूतेर्वा सुवते र्वा' इति प्रतिपादितम्, पाणिनिना 'राजसूर्य सूर्य' (पा.३.१.११४) इत्यादि सूत्रेण सूर्यशब्दस्य निपातनात् सिद्धिः प्रत्यपादि । सरति गच्छति आकाशे इति सूर्यः,

अथवा षू प्रेरणे तुदादि परस्मैपदी धातौः क्यपोरूटि सूर्यः 'सुवति लोकं कर्मणि प्रेरयति' इति सूर्यस्य व्युत्पत्तिलभ्योऽर्थ इदमेव तथ्यं बोधयति यत् प्रेरकता सूर्यस्य आद्यो गुणः । विश्वस्मिन् विश्वे जीवनस्य गतिशीलतायाश्च महीयः प्रेरणा स्रोतः,

निखिलाञ्च भूतधात्री स्वमहिम्ना जनयिता, समेषु गतिमत्सु स्वकीयया गतिमत्तया नितरामति शयिता, सकलस्यापि जगतः नैजेषु क्रियाकलापेषु प्रवर्तयिता, निखिलभुवन भास्करः सूर्यःस्वमहिम्ना सर्वान् देवानतिशेते। स एव विश्वस्य भुवनस्य घटी-पलाहोरात्र-मासवर्षादीनां प्रवर्तयिता देवाधिदेवो लोक लोचन रोलम्बकदम्बैः क्रियासमभिहारेण सविस्मयं सममेव दृग्गोचरी क्रियते । ऋग्वेदभाष्ये सायणाचार्येण ''सरति गच्छति वा'' सुवति प्रेरयति वा तत्तद्व्यापारेषु कृत्स्नं जगदिति सूर्यः, यद्वा सुष्ठु ईर्यते प्रकाश प्रवर्षणादि व्यापारेषु प्रेर्यते इति सूर्यः''इति समाम्नातम् । अथर्ववेदे सूर्य चक्षुषो पतिरिरिति स्वीकृतः-**''सूर्यश्चक्षूषामधिपतिः स मावतु''**[१]। ऋग्वेदे सूर्यदेवस्य महिमानं स्वरूपञ्च प्रकटयन्ति चतुर्दश परिमितानि सूक्तानि सन्ति । एतेषु सूक्तेषु प्रायः सूर्यशब्दस्य भौतिकसौरमण्डलस्य बोध एव जायते । ऋग्वेदीय सूर्यसूक्ते सूर्यदेवस्य स्वरूपं सुस्पष्टमुद्घाटितं वर्त्तते। तथा हि-

**चित्रं देवानामुगादनिकं चक्षुर्मित्रस्य वरूणस्याग्नेः ।**
**आ प्राद्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च ।।**[२]

सायणाचार्यानुसारं चित्रमित्रस्य आश्चर्यजनकमित्यर्थः । स खलु समग्रस्य स्थावर जंगमात्माक कार्यवर्गस्य मूलभूतं कारणम् । कार्यञ्च कारणादतिरिक्तं किमपि नास्ति । यतो हि सूर्यश्चराचरस्य महतो जगद्रूपस्य जीवनाधायको विद्यिते, अतः स आत्मेति व्यवह्रियते । समुपजायते सूर्योदये निश्चेष्टं जगत् सचेतनं जायते । सूर्यस्य महिमानं प्रतिपिपादयिषता महर्षिणा उक्तमस्ति-

**तत्सूर्यस्य देवत्वं तन्महित्वं मध्या कर्तोर्विततं सं जभार ।**

..............................................................................................

१. अथर्व. ५. २४. ९.

२. ऋग्वेद. १. ११४. ९,

३. ऋग्वेद. १. ११४. ४

**यदेदयुक्त हरितः सधस्थादाद्रात्री वासस्तनुते सिमस्मै ।।**[२]

लोकलोचनभूतस्य सूर्यस्य प्रकाशप्रक्रियायाः सुचारू चित्रणमस्मिन् मन्त्रे समुपलभ्यते । स प्रारब्धानि अथ च अपरिसमाप्तानि कृत्यानि कर्माणि परित्यज्य अस्ताचलं जिगिमिषुः स्वकिरणजालं लोकदमुष्मात् संहरते तदा रात्रिजनितो अन्धकारः सकलमपि लोकमावृणुते ।

सूर्यस्य माहात्म्यममुनापि प्रकटितं यत् स सर्वत्र विप्रकीर्णान् स्वकिरणान् अनायासेनैव संहरते, यत् कार्यं महामहीशालिभिः देवैर्महता प्रयत्नेन महीयसा कालेनापि दुःसाध्यम् । अमुनेदं सिध्यति यत् मनुजैः स्वकर्मजालं तावदेव प्रसारणीयं यावदेव तद् अनायासेन समयसीम्नि एव उपसंहर्तुं शक्येत । सूर्यस्य उपस्थितिज्ञानस्य प्रकाशं तनोति, तदेव दिनम् अस्ति यस्मिन् मनुजन्मानः स्वे स्वे कर्मणि प्रवर्तिता भवन्ति ।

सूर्यस्यानुपस्थितिरज्ञानान्धकारो यत्र जनाः स्वकर्तव्यकर्माणि परित्यजन्ति, सा एव रात्रिः । उषोदेवी भुवन मण्डलं हिरण्य वर्ण रञ्जितं प्रथमं विधत्ते, तदनन्तरं सुर्यःउदेति । प्रत्यक्ष देवत्वेन तस्य न काचिदपि मूर्तिः परिकल्पते । साक्षाद् एव उपस्थानम् अर्घ्यादिकञ्च प्रदीयते । वेदेषु सूर्यस्य महत्त्वं प्रतिपादितम् । जगत आत्मरूपेण विद्यमानस्य सूर्यस्य यदि क्षणमात्रमपि उपलब्धिविरहो वर्तेत तर्हि जगतोऽस्तित्वमेव संशयितं कल्पेत । पूर्वकल्पवत् विद्यात्रा सूर्याचन्द्रमसौ यथापूर्व विनिर्मितौ ‘सूर्याचन्द्रमसौ धाता यथा पूर्वमलल्पयत्’ इति । एकस्मिन् मन्त्रे सूर्यः प्राणत्वेन चन्द्रश्च रयित्वेन परिकल्पितः । रयिशब्देन स्त्रीशक्तिरभिधीयते। प्राणाः स्वयं प्रकाशाः, रयिश्च परप्रकाशयुक्ता निगद्यते । चन्द्रस्य प्रकाशः सूर्याद् गृहीतो विद्यते । तथाहि प्रश्नोपनिषदि ‘आदित्यो ह वै प्राणो रयिरेव चन्द्रमाः [१]। सूर्यस्य किरणैः समग्रमपि विश्वं प्राणितं भवति । यत्रप्राणात्मकस्य सूर्यस्य प्रवेशः तत्रैव जीवनम् । अत एव भवनादीनां संरचना एतादृशी विधीयते यत्र अधिकाः सूर्य मरीचयः प्रविशेयुः, गृहाणि त शुध्येयुः । रोगजनकानां कृमीणां विनाशोऽपि एताभिरेव सूर्यस्य रश्मिभिर्निःशेषं विधीयते । कृष्णवर्णशालिना रजोगुणेन स जगतश्चर अचरात्मकस्या अमृतं मृत्युं वा नियमयति ।

ऋग्वेदस्य प्रथममण्डलीयं सूक्तमिदं सूर्यस्य धाम स्थितिं वा विवर्णयिषति-

---

१. प्रश्नोपनिषद् . ७. १. ५,

२. ऋग्वेद. १. ३५. २,

**आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यञ्च ।**
**हिरण्ययेन सविता रथेनादेवो याति भुवनानि पश्यन् ।।(२)**

मन्त्रोऽयं भगवतो विवस्वतः पूजायां विनियुक्तः हिरण्यमयं रथमारूह्य सूर्यदेवो भुवनान्यवलोकयन् गतिशीलो भवति । स जगत सकलानां कार्यजातानां प्रेक्षकः प्रेरकश्च वरीवर्ति ।

चतुर्दशभुवनानि सुतरां निरूपयन् सर्वेषां मनुजन्मनां मार्गदर्शनं करोति सः । इदमपि निर्विवादं यत् चन्द्रार्काभ्यामेव कालचक्रस्य नियमनं विधीयते । अतः स निशाया नाथो विशेषतश्च तिथिनक्षत्राणम्। मन्त्रेऽस्मिन् ''आकृष्णेन रजसा'' इति स्पष्टमिदं प्रतिपादयति यत् कृष्णपक्षः सूर्यस्य, शुक्लपक्षश्च चन्द्रमसः, इत्येवं प्रत्येकस्मिन् मासे पक्षद्वयस्य नियमनम् उररीक्रियते ।

नभमण्डले सूर्यस्य जाज्वल्यमानः प्रकाशो मूर्तस्य अग्निदेवस्य मुखमिवाभासतेस्य अग्नेरनीकं बृहतः सपर्य दिवि शुक्रं यजतं सूर्यस्य ।(१)

सूर्यो हि विराड् ब्रह्मणश्चक्षुभ्यां समुत्पन्नः । पुरूषसूक्ते महर्षिणा दृष्टम्-चक्षोः सूर्यो अजायत सूर्यदेवस्येदं वैशिष्ट्यं यत् सः उरूचक्षा विश्वचक्षुश्च वेविद्यते । ऋग्वेदे स्पष्टम् उदीरितमस्ति-शंनः

**सूर्य उरूचक्षा उदेतु ।(२)**
**सूराय विश्व चक्षुसे ।(३)ॉ**

स विश्वस्य जगतः द्रष्टा सर्वेक्षकश्च वर्तते । सूर्यस्योदये प्रबुद्धा मनुजन्मानः स्व-स्व कर्मसु प्रवर्तन्ते दैनन्दिनानि कृत्याजातानि यथावत् विधातुं प्रवृत्ता भवन्ति । तथा चोक्तं ऋग्वेदे-उद्वेति सुभगा विश्वचक्षाः साधारणः सूर्यो मानुषाणाम् ।(४)

सः निखिलमपि चराचरं जगत् नैजेषु कर्तव्यकृत्येषु नियोजयति । सर्वेषां लोकानां

---

१. ऋग्वेद. १०. ७. ३,

२. ऋग्वेद. ४. ३५. ८,

३. ऋग्वेद. १. ५०. २,

४. ऋग्वेद. ७. ६३. १,

५. ऋग्वेद. ६. ६३. २,

६. ऋग्वेद. ५. ८१. ३,

क्रियाकलापान् कृत्यादिकञ्च स्वयं विलोकयति तान् स्व स्व कर्तव्यं प्रति प्रेरयति, उद्बोधयति च । अस्य दिव्यं रथमेक एवाश्वः परिवहति, तस्य च नाम एतशः ।

यथा-समानं चक्रं पर्याविवृत्सन् यदेतशो वहति धूर्षु युक्तः ।(५)

असौ एतशशब्दः सारथये प्रयुक्त इति प्रतिभाति । ''हरितः'' इति शब्दः अश्वार्थे प्रयुक्तो दृश्यते । एतशो हरिद्भ्यो भिन्नोः, तथा च तान् अतिशेते ।(६) एतशो दिव्यशक्तित्वेन उदाहृतः । अन्यस्मिन् प्रसंगे सूर्यस्य नैकेऽश्वा वर्णिता ये तस्य रथं वहन्ति-भन्द्रा अश्वा हरितः सूर्यस्य ।(१) अन्यच्च-सप्त त्वा हरितो रथे वहन्ति देव सूर्य ।(२) इमेऽश्वा बडवा वा सूर्यस्य मरीचयो वर्णिताः । ताः सूर्यस्य रथं वहन्ति, तञ्च आनयन्ति । तथा हि-तं सूर्य हरितः सप्त यह्वीःस्पशं विश्वस्य जगतो वहन्ति ।(३)

ऋग्वेदीयेऽन्यस्मिन् सूक्ते सूर्यस्य, तस्य रथस्य अश्वानाञ्च विशदं वर्णनंसमुपलभ्यते-

**सप्त युञ्जन्ति रथमेकचक्रमेको अश्वो वहति सप्तनामा ।**
**त्रिनाभि चक्रमजरमनर्व यत्रेमा विश्वा भुवनानि तस्थुः ।।**(४)

अस्यायमाशयो यत् सूर्यस्यैकचक्रे रथे सप्त अश्वः नियुक्ता रथं वहन्ति । वस्तुतस्ते सप्ताश्वाः न, प्रत्युत सप्तनामा एक एव अश्वो वर्तते । यद्वा सप्तसु स्थोनेषु नमनशील एक एवाश्वो रथं वहति। रथचक्रोऽस्मिन् चाकाशीति चक्रमिदं द्रढीयः न च कदापि जीर्यते । अमुमेनाधारीकृत्य समेऽपि लोकाः स्थिराः ।

वस्तुतः रथचक्रादिरूपेण देवस्य माहात्म्यमेव उपवर्ण्यते । मनुजानामिव तेषां काष्ठादि निर्मिता रथा न विद्यन्ते, स्वमहिमानुसारं रथचक्रादीनि स्वतः एव आविर्भवन्ति । मन्त्रेऽस्मिन् रथशब्दस्य वर्णने प्रार्थनायाञ्चैव तात्पर्यम्। रथशब्दं सिसाधयिषता निरूक्त कारेण यास्केन स्थिरशब्दविपरीतो रथशब्दः प्रतिपादिताः । स्थिरशब्द एव वर्णविपर्येण रथरूपे परिणत इति

---

१. ऋग्वेद. १. ११५. ३,

२. ऋग्वेद. १. ५०. ८,

३. ऋग्वेद. ४. १३. ३,

४. ऋग्वेद. १. १६४. २,

प्रतिभाति ।

सूर्यस्य वोढारः किरणास्तस्याश्वा एव । रश्मिः एक एव, अर्थात् स एकजातित्व अवच्छिन्नो वर्तते। स सप्तसंख्याक इत्यत्रापि नैकानि कारणानि दरीदृश्यन्ते । सप्तरूपा रश्मयो वर्ततेऽतः तेषां सप्त संख्या स्वीक्रियते । अन्यच्च जगत्यस्मिन् हेमन्त शिशिर वसन्त ग्रीष्म वर्षा शरदः षड्तवः सप्तमश्चैकः सामान्य ऋतुः । एवं परिगणनेनैतेषां सप्त संख्या निष्पद्यते । एतेषां सप्तानामृतूनां कारणं सूर्यस्य रश्मय एव । एतेषां तारतम्येन प्रकृत्यां परिवर्तनं सन्दृश्यते । अतः सप्तविध परिवर्तन विधीयकाः रश्मयः सप्त एव गण्यन्ते ।

सप्तलोकेषु सूर्यस्य प्रकाशः प्राणस्वरूपः तत्रत्यान् जनान् स्वतेजसा समुल्लासति । सप्तलोकेभ्यः सम्बद्धतया अपि इमे रश्मयः सप्तसंख्यकाः, तच्च सप्तनामा इति पदेन स्फुटीभवति । सूर्यप्रत्यक्षदेवता वर्तते । एवमेव वायुरग्निरपि । प्रत्यक्षरूपेण दृक् पथमापततः । सूर्योऽग्निवायुश्चेति त्रयोऽपि प्रकृतेः स्वरूपाणि । एतेषां पारस्परिकः सम्बन्धः 'अस्यवामस्य' इति नाम्नि सूक्ते सुस्पष्टं प्रतिपादितः । तथा हि-

**अस्य वामस्य पलितस्य होतुस्तस्य भ्राता मध्यमो अरत्यश्नः ।**
**तृतीयो भ्राता धृतपृष्ठो अस्यात्रपश्यं विश्पतिं सप्तपुत्रम् ।।(१)**

अयं मन्त्रः सुविशदं व्याख्यानमपेक्षते । अस्यायमर्थोऽधिदैवतमूलकः वामस्यसर्वेभ्यः प्रकाशप्रदस्य, पलितस्यङ्गनिखिलस्य लोकस्य पालकस्य, हेतुः यज्ञ यागादिषु स्तुतिपूर्वकमाह्वातव्यस्य अस्य सुप्रसिद्धस्य प्रत्यक्षदेवस्य सूर्यस्य मध्यमः भ्राता अन्तरिक्षस्थो वायुः, अश्नः सर्वव्यापकोऽस्ति । अस्य तृतीयःभ्राता धृतपृष्ठधृतं पृष्ठ प्रदेशे धारयिता अर्थात् धृतेन प्रदीप्ततामावहन् अग्निरूपो वर्तते ।

एतेषु त्रिषु भ्रातृषु सप्तपुत्रम्किरणस्वरूपान् सप्तपुत्रान् विस्तारयितारं सूर्यदेवं, विश्पतिम् जगतः

---

१. ऋग्वेद. १. १६४. १,

२. ऋग्वेद. ५. ८२. ५,

पालयितारम्, अपश्यं जानामि । मन्त्रेऽस्मिन् त्रयाणां देवानां पारस्परिक सम्बन्धं निरूपयता महर्षिणा प्रकृतेस्तिसृणां शक्तीनां प्रत्यक्ष देवतात्वेन समन्वयः प्रदर्शितः ।

सूर्यस्य उदयादारभ्य सकलस्य जगत सर्वाणि कार्याणि प्रारभ्यन्ते । स एवाहोरात्रस्य मासानां ऋतुचक्रस्य च नियन्ता वरीवर्ति । सूर्यस्योष्माणं विना वृक्षेषु पुष्पाणि विकासं न जायन्ते, फलानि च न परिपक्वतां भजन्ते । क्षेत्रेषु धान्यादिकं न पच्यन्ते तृणादिकमपि नोद्गच्छति । फलतः प्राणिनः प्राणान् धारयितुं न शक्नुवन्ति । सूर्यस्य रश्मिषु मानवोपयोगीनि सकलान्यपि तत्त्वानिवद्यन्ते । तस्मिन् समेषां रोगाणां दुरितानां वा अपाकरणस्य अनुपमं सामर्थ्यम् । अनेनैव कारणेन दुरितानां दुरीकरणस्य प्रार्थना विधीयते -

विश्वानि देव सवितर्दुरितानि परासुव ।

**यद् भद्रं तन्न आ सुव ।।**[२]

वैज्ञनिकदृशाऽप्येतद् स्फुटीभवति यत्सूर्यस्य सुचारू समुचितेन सेवनेन पौष्टिक तत्त्वानि स्वत एव प्राप्यन्ते । स वरणीयतत्त्वानि निर्बाधं प्रददाति । अन्यस्य कस्यापि पौष्टिकपदार्थानाम् उपयोगस्य न काप्यावश्यकता अनुभूयते । उक्तञ्च-

**तत्सवितुर्वृणीमहे वयं देवस्य भोजनम् ।**

**श्रेष्ठं सर्वधातमं तुरं भागस्य धीमही ।।**[१]

सूर्यातपस्य सेवनं स्वास्थ्यप्रदमारोग्यप्रदायकं रोगविनाशकञ्च भूयते । तद्रोगाणां रोगकृमीणाञ्च सर्वथा संहार-कारतम् । उदीयमानस्य सूर्यस्य नियमितं सेवनं हृदयस्य मस्तिष्कस्य च निखिलानपि विकारान् नाशयति । तथोक्तम् -

**आ देवो याति सविता परावतोऽप विश्वा दुरिता बाधमानाः ।।**[२]

**अपसेधन् रक्षसो यातुधानानस्थाद् देवः प्रतिदोषं गृणानः ।।**[३]

ऋग्वेदे हृद्रोगनिवारणायाप्यस्य विहिता प्रार्थना समुपलभ्यते-

**उद्यन्नद्य मित्रमह आरोहन्नुत्तरां दिवम् ।**

---

१. ऋग्वेद. ५. ८२. १,

२. ऋग्वेद. १. ३५. ३,

३. ऋग्वेद. १. ३५. १०,

४. ऋग्वेद. १. ५०. ११,

**हृद्रोगं मम सूर्य हरिमाणं च नाशय ।।**[४]

उद्यन् नभोमण्डलं चारोहन् सूर्यः हृद्रोगं पाण्डुरोगञ्च प्रणाशयतु । 'उद्यन्' आरोहन् इति शब्दयोः प्रयोगप्रकटयति यत् मध्य ह्नपूर्वस्य प्रकाशः एव उपर्युक्तानां रोगाणां विशेषतो विनाशकारकः । सूर्यश्चक्षुषामधिपतिरधिष्ठाता चेति विश्रुतम् । ततो नेत्राणां ज्योतिरपि सूर्यस्य प्रसादेन वृद्धिमश्नुते। रोगाणामुपचारेण प्रतिविधानेन च दीर्धायुष्यं लभ्यते । शास्त्रविदः कथयन्ति-

**आरोग्यं भास्करादिच्छेत् धनमिच्छेत् हुताशनात् ।**
**शंकरात् ज्ञानमन्विच्छेत् मोक्षमिच्छेज्जनार्दनात् ।।**[१]

वैदिकसाहित्ये भूरिशो मन्त्राः सम्प्राप्यन्ते येषु सूर्यस्य दीर्धायुष्यस्य च प्रत्यक्षः सम्बन्धो दरीदृश्यते। यजुर्वेदस्यामुष्मिन् मन्त्रे शतं वर्षाणि यावत् जीवनस्य कामना संलक्ष्यते । तथा च-

**तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् ।**
**पश्येम शरदः शतं जीवेम शरदः शतम् ।।**[२]

देवहितं देवैः धारतिं स्थापितं ज्योतिरूपं सूर्यात्मकं तेजः पूर्वस्यां दिशि उदेति । सूर्यस्यानुग्रहेण वयं शतं वर्षाणि पश्येम, शरदः शतञ्च जीवेम । मनुजन्मनः पूर्णायुरधिगन्तुं प्रत्येक मानवस्य वाञ्छा प्रार्थनारूपेणात्र प्रतिष्ठापिता ।

**आदित्यं सम्यक् परिज्ञाय मृत्युविरहितो जायतेमानवः-**
**वेदाहमेतं पुरूषं महान्तं मादित्यवर्ण तमसः परस्तात् ।**
**तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय ।।**[३]

तमसः परस्तत् सूर्यमण्डलस्थं पुरूषं ज्ञात्वा मानवः मृत्युमत्येति । मोक्षप्राप्तेर्नान्यः कश्चन उपायो विद्यते । पूर्णप्रकाशप्रदः स एव परमात्मा सूर्यः । एतदेव वैदिक साहित्ये सूर्यतत्त्वं समासतोऽत्र निरूपितम् । इति शम् ।

---

१. आरोग्यम् (नी.शा.)

२. शु. यजु. ३६. २४,

२. शु. यजु. ३१. १८,